# शैक्षिकगुणोत्कर्षः

केन्द्रीयसंस्कृतविश्वविद्यालयेन देहलीस्थे मुख्यालये सप्तदिनव्यापिनी **शैक्षिकगुणोत्कर्षः** (**स्वाध्यायः - शिक्षा - शोधः**) - Excellence in Education Quality इति शीर्षकान्विता कार्यशाला 22/11/23 तः 27/11/23 पर्यन्तं समायोज्यते। अस्यां कार्यशालायां न केवलं केन्द्रीयसंस्कृतविश्वविद्यालयस्य शोधच्छात्राः अपि तु JNU, DU, NSU, CCU इत्येतेषां विभिन्नविश्वविद्यालयानां शोधच्छात्राः (55 सङ्ख्याकाः) अपि आसप्ताहं पूर्णशः भागं गृह्णन्ति। कार्याशालायाः उद्घाटनसमापनयोः विशिष्टव्याख्यानानां च आन्तर्जालिकप्रसारः अपि विधीयते।



## उद्घाटनसमारोहः

उद्घाटनसमारोहः २२/११/२३ तमे दिनाङ्के सायं समजनि। उद्घाटनं माननीयैः कुलपतिभिः आचार्यैः श्रीनिवासः वरखेडीवर्यैः विहितम्।

### उद्घाटकभणितिः

प्रत्येकम् अपि पदार्थस्य गुणः भवत्येव। बाह्योपाधिना तस्य गुणः ईषदिव वर्धेत। मानवस्य आन्तरिकः चिन्तनगुणः विशेषः। मानवः स्वाध्यायेन अष्टगुणितं फलं प्राप्तुं शक्नोति। स्वाध्यायः शिक्षा शोधः इत्येतत् त्रितयं व्यक्तिसम्बद्धं वर्तते। प्रवचनं प्रशिक्षणं प्रकाशनं इत्येतत् संस्थासम्बद्धं वर्तते। स्वाध्यायबलेन प्रवचनं शिक्षाबलेन प्रशिक्षणं शोधबलेन च प्रकाशनं भवेत्। सार्थकः क्रमः एष एव। **शोधः शोथः मा भूत्।** भारभूतेन शोधेन किमपि प्रयोजनं नास्ति। शिक्षकः कियन्ति वर्षाणि सेवाकार्यं कृतवान् इत्येषः न विशेषः।सः कियन्तं कालं शिक्षां दत्तवान् इत्येषः एव प्रधानः। केवलं साधनसङ्ग्रहेण प्रयोजनं नास्ति। इतिकर्तव्यता सर्वेणापि ज्ञेया। समेषां मङ्गलं भवतु। संयोजकाय स्वस्ति च।

**आचार्यः श्रीनिवासः वरखेडी**

**कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली**



## उद्बोधकभणितिः -

स्वम् - आत्मा । आत्मनः ब्रह्मणः वा अध्ययनम् इत्यर्थः भवति। स्वाध्यायः नाम वेदाध्ययनमपि सम्भवति। स्वतन्त्रतया अध्ययनं स्वाध्यायः। स्वाध्यायः शिक्षा शोधः इत्येतत् त्रितयं वर्तते। अतः एतेषां सङ्कलितं विश्लेषणं करणीयम्। - आचार्यः बनमाली बिश्वालः, अधिष्ठाता , शैक्षिकवृत्तम् ।

**आचार्यः बनमालीबिश्वालः**

**अधिष्ठाता, शैक्षिकवृत्तम्, के.सं.वि. नवदेहली**

## प्रबोधकभणितिः -

Computer Science पठनमात्रेण कोऽपि लाभः नास्ति। Artificial Intelligence इत्यस्याः (कृत्रिमबुद्धेः ) प्रभावः समधिकः वर्तते। तस्याः लाभः संस्कृतज्ञैः स्वीकर्तुं प्रयत्नः करणीयः। एतत्सर्वं स्वाध्यायबलेन अपि सम्पादयितुं शक्यते। गणकशिक्षा संस्कृतज्ञैः सुलभतया अर्जयितुं शक्यते। शोधकार्ये सौलभ्यमपि अनेन नूनं जायते। युवानः आसक्ताः भवन्तु।

**आचार्यः मदनमोहन झा**

**अधिष्ठाता, छात्रकल्याणम्, के.सं.वि. नवदेहली**



**सम्बोधकभणितिः -**

आत्मना आत्मकृतस्य शोधकार्यस्य निरीक्षणं परीक्षणं च करणीयम्। अनन्तरं तन्त्रांशः तत्सर्वं करोति । शोधच्छात्रे आदौ एतद्विषये विश्वासः भवतु । अनन्तरं तन्त्रांशे विश्वासः कर्तव्यः। विश्वसनीयता वैधता सम्भावनीयता इत्येतादृशाः गुणाः भवतां शोधेषु भवेयुः एव । भारते भारतीयज्ञानप्रणालीम् आश्रित्य शोधकार्याणि कृत्वा कीर्तिभाजः भवन्तु।

**आचार्यः रा. गा. मुरलीकृष्णः**

**कुलसचिवः, के.सं.वि. नवदेहली**

**संवाहकभणितिः -**

गुणकर्मस्वभावेषु परिष्कारः छात्रस्य आदौ भवेत्। शोधनम् एतेषु विषयेषु भवेत्। तदग्रे शोधप्रबन्धस्य गुणवत्तां वर्धयितुं शक्नुमः। एकैकोऽपि आदौ कर्ता भवतु। अनन्तरं कारयिता स्वतः भविष्यति। प्रशिक्षणं लभन्ताम्।

**आचार्यः वाई. एस्. रमेशः**

**अधिष्ठाता, बहुविषयकविज्ञानं प्रविधिश्च, के.सं.वि. नवदेहली**




**संयोजकः –**

डॉ. गणेश ति. पण्डितः

उपनिदेशकः (प्रकाशनम्), के. सं. वि. नवदेहली